शयनीयं, क्ली, (शेतेऽस्मिन्निति । शी + अधिकरणे अनीयर् ।) शय्या । इत्यमरः ॥ (यथा, माघे । ११ । ५ ।

"रतिपरिचयनश्यन्निद्रतन्द्रः कथञ्चित्
गमयति शयनीये शर्व्वरीं किं करोतु ॥"*॥ )

शयनयोग्ये, त्रि ॥ (यथा, रामायणे । २ । ७२ । ११ ।

"शून्योऽयं शयनीयस्ते पर्य्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥")

शयनीयकं, क्ली, (शयनीयमेव । स्वार्थे कन् ।) शय्या । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । ३३ । १७७ ।

"गत्वा कलिङ्गसेनायाः सुप्तायाः शयनीयके ।
सुप्तं मदनवेगं तं स्वरूपे स्थितमैक्षत ॥")

शयनैकादशी, स्त्री, (शयनाय शयनस्य वा एकादशी ।) श्रीहरेः शयनसम्बन्धितिथिः । सा आषाढ़शुक्लैकादशी । तद्विवरणं शयनशब्दे हरिशयनशब्दे च द्रष्टव्यम् ॥

शयानकः, पुं, (शी + शानच् । ततः कन् । यद्वा, "आनकः शीङ्भियः ।" इति आनक् ।) सर्पः । इत्युणादिकोषः ॥ कृकलासः । इति हेमचन्द्रः ॥

शयालुः, त्रि, (शयनशीलः । शी + "शीङो ग्रहणं कर्त्तव्यम् ।" ३ । २ । १५८ । इत्यस्य वार्त्तिकोक्त्या आलुच् ।) निद्रालुः । इत्यमरः ॥ (यथा, माघे । २ । ८० ।

"उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥")

शयालुः, पुं, (शी + आलुच् ।) अजगरः । कुक्कुरः । इति हारावली ॥

शयितः, त्रि, (शी + क्तः ।) निद्रालुः । इत्यमरः ॥ (कृतशयनः । यथा, कथासरित्सागरे ।५६।१८७।

"तयोः क्षपितयोः स्वामि भुक्ते भोजितयो-
स्तयोः ।
शये शयितयोस्तेन ज्ञानमीदृग्विधं मम ॥")

वसन्तकुसुमे, पुं । यथा,—

"वसन्तकुसुमः शेलुः शयितो द्विजकुत्सितः ।"
इति शब्दमाला ॥

शयने, क्ली ॥

शयितवान्, त्रि, निद्रालुः । शीङ्धातोः क्तवतुप्रत्ययेन निष्पन्नमेतत् ॥

शयुः, पुं, (शेते इति । शी + उः ।) अजगरः । इत्यमरः ॥ (ऋषिविशेषः । यथा, ऋग्वेदे । १ । २१२ । १६ ।।

"याभिर्नरा शयवे याभिरत्रये ॥"

"हे नरा नेतारावश्विनौ पुरा पूर्व्वस्मिन् काले शयवे एतत् संज्ञकाय ऋषये ।" इति तद्भाष्यम् ॥ शयाने, त्रि । यथा, ऋग्वेदे । ४ । १८ । १२ ।

"कस्ते मातरं विधवामचक्रत्
शयुं कस्त्वामजिघांसच्चरन्तम् ॥"

"कस्त्वोऽन्यः शयुं शयानं चरन्तं जाग्रतं वा त्वां अजिघांसत् ।" इति तद्भाष्यम् ॥)

शयुनः, पुं, अजगरः । इत्युणादिकोषः ॥

शय्या, स्त्री, (शी शयने + "संज्ञायां समजेति ।" ३ । ३ । ९९ । इति क्यप् ।) गुम्फनम् । इति मेदिनी ॥ शेरते यत्र सा । तत्पर्य्यायः । शयनीयम् २ शयनम् ३ । इत्यमरः ॥ तल्पम् ४ । इति जटाधरः ॥ शयनीयकम् ५ । इति शब्दरत्नावली ॥ तस्या गुणाः ।

"सुखशय्यासनं सेव्यं निद्रापुष्टिधृतिप्रदम् ।
श्रमानिलहरं शस्तं विपरीतमतोऽन्यथा ॥
भूशय्यानिलपित्तघ्नी बृंहणी शुक्रवर्द्धिनी ।
खट्टा तु वातला प्रोक्ता पट्टो रूक्षोऽतिवा-
तलः ॥"
इति राजवल्लभः ॥*॥

अपि च ।

"त्रिदोषशमनी खट्टा तूली वातकफापहा ।
भूशय्या बृंहणी वृष्या काष्ठपट्टी तु वातला ॥"

अन्यत् पुनराह ।

"भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी ।
सुशय्याशयनं हृद्यं पुष्टिनिद्राधृतिप्रदम् ।
श्रमानिलहरं वृष्यं विपरीतमतोऽन्यथा ॥"
इति भावप्रकाशः ॥ * ॥

तद्गमनविधानं यथा,—

"कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ।
गच्छेत् शय्यामस्फुटितामपि दारुमयीं नृप ॥
नाविशालां न वै भग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधिगच्छेदनास्तृताम् ॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः ॥*॥

तद्दानफलं यथा । याज्ञवल्क्यः ।

"गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् ।
यानं वृक्षं प्रियं शय्यां दत्त्वात्यन्तं सुखी भवेत् ॥"

प्रियं यद्यस्य हर्म्म्यादि । प्रतिग्रहसमर्थेन शय्या न प्रत्याख्येया । यथा याज्ञवल्क्यः ।

"कुशाः शाकं पयो मत्स्या गन्धाः पुष्पं दधि
क्षितिः ।
मांसशय्यासनं धानाः प्रत्याख्येयं न वारि च ॥"

व्रतोद्देश्यकदत्तशय्याग्रहणे दोषो यथा । ब्रह्मपुराणम् ।

"शय्यालङ्कारवस्त्रादि प्रतिगृह्य व्रतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥"*॥

सा च औत्तानाङ्गिरोदेवताका । यथा,—

"छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ।
उपानहौ तथा यानं तथा यत् प्राणवर्ज्जितम् ।
औत्तानाङ्गिरसन्त्वेतत् प्रतिगृह्णीत मानवः ॥"
इति शुद्धितत्त्वम् ॥ * ॥

पुष्याभिषेके शय्यापट्टकं यथा,—

"सर्व्वरत्नमलङ्कारं पट्टं कार्य्यं द्विहस्तकम् ।
हस्तविस्तार उच्छ्राये दशाङ्गुल्यः सुशोभनम् ॥
स्नानाख्यं सार्द्धहस्तन्तु पट्टं वृत्तासनान्वितम् ।
शय्याख्यं द्विगुणा दैर्घ्यादङ्गुमानं सपीठकम् ॥"

इति देवीपुराणे त्रैलोक्याभ्युदयपादे पुष्याभिषेकनामाध्यायः ॥

शरं, क्ली, (शॄ + अप् ।) जलम् । इति मेदिनी ॥

शरः, पुं, (शृणात्यनेनेति । शॄ हिंसे + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) वाणः । इत्यमरः ॥ (यथा, रघुः । १ । ६१ ।

"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥")

दध्यग्रभागः । इति मेदिनी ॥ दुग्धशरस्य नामान्तरम् । सन्तानिका । दधिशरस्य नामान्तरम् । दधिसारः । दधिस्नेहः । कट्टरञ्च । इति रत्नमालादयः ॥ तृणविशेषः । काँड़ा इति हिन्दी भाषा । (यथा, महाभारते । १ । १३८ । १५ ।

"आचार्य्यः कलशाज्जातो द्रोणः शस्त्रभृतां-
वरः ।
गौतमस्यान्ववाये च शरस्तम्बाच्च गौतमः ॥")

तत्पर्य्यायः । इषुः २ काण्डः ३ वाणः ४ मुञ्जः ५ तेजनः ६ गुन्द्रकः ७ । इति रत्नमाला ॥ उत्कटः ८ शायकः ९ क्षुरः १० इक्षुप्रः ११ क्षुरिकापत्त्रः १२ विशिखः १३ । अस्य गुणाः । मधुरत्वम् । सतिक्तत्वम् । कोष्णत्वम् । कफश्रान्तिमदापहत्वम् । बलवीर्य्यकारित्वम् । नित्यं निषेवितश्चेत् किञ्चिद्वातकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"भद्रमुञ्जः शरो बाणस्तेजनश्चक्षुवेष्टनः ।
मुञ्जो मुञ्जातको वाणः स्थूलदर्भः सुमेधसः ॥
मुञ्जद्वयन्तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित् ।
दोषत्रयहरं वृष्यं मेखलासूपयुज्यते ॥"
इति भावप्रकाशः ॥

उशीरः । महापिण्डीतरुः । इति च राजनिर्घण्टः ॥ हिंसा । इति शृधात्वर्थदर्शनात् ॥ (ज्योतिषोक्तपञ्चमाङ्कः । यथा, साहित्यदर्पणे । ४ । २६४ ।

"वेदखाग्निशराः शुद्धैरश्ववाणाग्निसायकाः ॥")

शरजं, क्ली, (शरात् जायते यत् तत् । जन् + डः ।) हैयङ्गवीनम् । इति हेमचन्द्रः ॥ नवनीतम् । इति केचित् ॥

शरजन्मा, [न्] पुं, (शरे शरवणे जन्म यस्य ।) कार्त्तिकेयः । इत्यमरः ॥ (यथा, रघुः ।३।२३ ।

"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥")

शरटः, पुं, (शॄ + शकादित्वात् अटन् ।) कुसुम्भशाकः । इति रत्नमाला ॥ कृकलासः । इत्यमरटीका ॥ (यथा,—

"भट्टस्य कण्ठं शरटः प्रविष्टः ॥"
इति हास्यार्णवे ।)

शरणं, क्ली, (शृणाति दुःखमनेनेति । शॄ + ल्युट् ।) गृहम् । (यथा, महाभारते । १ । १०६ । ४ ।

"ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवागृषिः ।
दीप्यमानेषु दीपेषु शरणं प्रविवेश ह ॥")

रक्षिता । इत्यमरः ॥ (यथा, वैराग्यशतके ।६१।